I2OR Impact Factor : 3.015

ISSN : 2395 - 5104

# शब्दार्णव Shabdarnav

*International Peer Reviewed Referred Journal of Multidisciplinary Research*

Year 7 Vol. 14, Part-IV July-December, 2021

Scientific Research
Educational Research
Technological Research
Literary Research
Behavioral Research

Editor in Chief
DR. RAMKESHWAR TIWARI

Executive Editors
DR. KUMAR MRITUNJAY RAKESH
MR. RAGHWENDRA PANDEY

Published by
SAMNVAY FOUNDATION
Mujaffarpur, Bihar

# भ्रमज्ञानसविमर्शः

डा. भास्करभट्टः जोशिः*

न्यायनये ज्ञानं द्विविधम् स्मृतिः अनुभवश्च[1]। अनुभवश्च द्विविधः यथार्थ अयथार्थश्च। समीचीनं ज्ञानं यथार्थानुभवः। दुष्टं ज्ञानमयथार्थानुभवः। रज्जुं दृष्ट्वा जायमानं 'इयं रज्जुः' इति ज्ञानं यथार्थानुभवः। 'अयं सर्पः' इति ज्ञानं अयथार्थानुभवः।

तदभाववति तत्प्रकारकोऽनुभवः अयथार्थः[2]। तदभाववन्निष्ठ-विशेष्यता-निरूपकत्वे सति तन्निष्ठप्रकारता -निरूपकत्वे सति अनुभवत्वम् अयथार्थानुभवस्य लक्षणम्। अत्रापि तत्पदेन प्रकारीभूतः धर्मः ग्राह्यः। रज्जुं दृष्ट्वा 'अयं सर्पः' इति भ्रमः जातः। अत्र 'अयं' इति पदेन रज्जु उच्यते। तस्यां च सर्पत्वरूपः धर्मः भासते। अतः सर्पत्वं प्रकारीभूतः धर्मः। तत्पदेन सर्पत्वं ग्राह्यम्। तच्च रज्जौ नास्ति। अतः तदभाववती रज्जुः। सा च विशेष्या। विशेष्यता रज्जुनिष्ठा। तया निरूपकं ज्ञानम्। पुनः तत्पदेन सर्पत्वं ग्राह्यम्। तन्निष्ठा प्रकारता। तस्याः च निरूपकं ज्ञानम्। एवञ्च ज्ञाने सर्पत्वाभाववन्निष्ठविशेष्यतानिरूपकत्वं सर्पत्वनिष्ठ-प्रकारतानिरूपकत्वं चास्ति, अनुभवत्वं च विद्यते इति क्षणसमन्वयः।

न्यायविदः भ्रमज्ञानमिदम् अन्यसम्प्रयोगादन्यविषयकं ज्ञानं प्रत्यक्षाभासमिति प्रत्यक्षाभासशब्देन व्यवहरन्ति। न्यायसिद्धान्ततत्त्वामृते प्रत्यक्षज्ञानञ्च भ्रमप्रमाभेदात् द्विविधमिति उच्यते। तत्र भ्रमज्ञानमेव अयथार्थज्ञानमिति व्यवह्रियते। क्वचित् पित्त-दूरत्व-तमो -विद्युत्-मण्डूकवसाञ्जन-अधर्मादिभिर्नानाविधैर्दोषैः पुरोवर्तिनि पदार्थे सत्यवस्तुस्वरूपनिर्धारणं न भवति। परन्तु विपरीतात्मकं सन्देहात्मकं वा ज्ञानं समुद्भवति। - यथा शङ्खे पीतश्शङ्ख इति, लोहितस्स्फटिक इति, वृक्षे स्थाणुर्वा पुरुषो वेति, चन्द्रे द्विचन्द्र इति, अनात्मनि शरीरे गौरोऽहमिति अम्बरे अञ्जनचूर्णपुञ्जश्यामं शार्वरं तम इति, आदर्शे मुखमिति वंशे उरग इति, धूमवदभिमतैः बाष्पादिभिः पर्वतो वह्निमानिति, विषाणित्वमात्रेण गवयसादृश्यादा अगवि गौरिति, प्रतारकवाक्यात् नद्यास्तीरे पञ्च फलानि सन्तीत्यादीनि अयथार्थज्ञानानि समुद्भवन्ति। एतानि अतत्वानुभवजनकत्वात् अप्रमा अयथार्थज्ञानम्, अविद्या, मिथ्याज्ञानम् भ्रमः, प्रत्यक्षाभास इत्यादिशब्दैः कथ्यन्ते। स्पष्टञ्चेदं न्यायवैशेषिकग्रन्थेषु। तत्र न्यायसूत्रे 1-1-2 न्यायभाष्ये च मिथ्याशब्देन, वैशेषिकसूत्रे 9-2-10,11 प्रशस्तपादभाष्ये च अविद्याशब्देन एतानि निर्दिष्टानि वर्तन्ते। अत्र च निर्दिष्टं लक्षणं न विद्यते। वैशेषिकसूत्रम् "इन्द्रियदोषात् संस्कारदोषाच्चाविद्या"[3] इति अविद्याकारणानि प्रतिपाद्य "अदुष्ट विद्या[4]" इति दुष्टं ज्ञानमविद्येति सूचयति। अन्यथाग्राहित्वम्, तदभाववति तत्प्रकारकत्वं वा दुष्टत्वमिति वक्तुं शक्यते। तत एव तद् दुष्टं ज्ञानमिति कथ्यते।

न्यायकन्दल्यां सन्दिग्धबाधिताध्यवसायात्मिका अविद्येति, देशकालावस्थादिभेदेन अबाध्यमानोऽध्यवसायो विद्येति, तद्विपरीता अविद्येति च वदन्त्या व्योमवत्या

*सहायकप्राध्यापकः, क.सं.वि, बेङ्गलूरु

देशकालावस्थादिभेदेन बाध्यमानोऽध्यवसाय अविद्येति, गुरुमते विशिष्टव्यवहारकारणं यन्न भवति तादृशं विज्ञानमविद्येति, अतस्मिन् तत्प्रत्यय इति[5] न्यायवार्तिक, तर्कभाषा कारिकावलीषु[6] अतत्वानुभव अप्रमेति सप्तपदार्थ्याम्, अर्थव्यभिचारि अप्रमाणजन्यं ज्ञानमयथार्थज्ञानम्, अस्य अयथार्थत्वञ्च तदभाववति तत्प्रकारकत्वमिति यथा पुरोवर्तिनि अरजते शुक्त्यादौ इदं रजतमिति रजतत्वारोप इति तर्कभाषायां।' यत्र यन्नास्ति तत्र तस्य ज्ञानम्'[7] इति तर्कदीपिकायञ्च,, तदभाववति तत्प्रकारकं ज्ञानम्, स्वसमानाधिकरणप्रकारानवच्छिन्नविषयताप्रतियोगिज्ञानम्, स्वव्यधिकरणप्रकारानवच्छिन्नविषयता-प्रतियोगिज्ञानमप्रमेति च चिन्तामणितर्कदीपिकयोः, तदभाववति तत्प्रकारकोऽनुभव[8] अप्रमेति तर्कसंग्रहे, प्रमाणाभासजन्य अयथार्थानुभव अप्रमेति तर्ककौमुद्याम्, स्वानुयोगिनिष्ठत्व, स्वावच्छिन्नत्व एतत्त्रितयसम्बन्धेन सम्बन्धविशिष्टान्यप्रकारताशालिज्ञानत्वमप्रमात्वमिति गादाधर्यवच्छेदकतानिरुक्तौ, विशेष्यताव्यधिकरणप्रकारकं ज्ञानमप्रमेति न्यायसिद्धान्तमञ्जर्याम्, मिथ्याज्ञानापरपर्याय अयथार्थज्ञाननिश्चय इति विश्वनाथीयगौतमसूत्रवृत्तौ, "तच्छून्ये तन्मतिर्या स्यात् अप्रमा सा[9]" इति कारिकावल्याम् तदभाववति तत्प्रकारकं ज्ञानं भ्रम इति, तदभाववन्निष्ठविशेष्यतानिरूपिता या तन्निष्ठा प्रकारता तन्निरूपितज्ञानत्वमप्रमात्वम्, रजतत्वाभाववच्छुक्तिनिष्ठविशेष्यतानिरूपिता या रजतत्वनिष्ठ प्रकारता तन्निरूपितज्ञानत्वस्य शुक्तौ इदं रजतमित्यत्र सत्वादिति च मुक्तावल्याम्, विपरीतार्थनिर्णय अप्रमेति तर्ककौमुद्याम्, यत्प्रकारिका या विषयता तत्प्रकारक व्यधिकरणविषयताकं ज्ञानं भ्रम इति मथुरानाथीये,"तदभाववति तत्प्रकारकं ज्ञानं भ्रम[10]' इति पदार्थरत्नमालयाम्, प्रमाभिन्नत्वे सति इन्द्रियत्वेन इन्द्रियजन्यं ज्ञानं भ्रम इति लक्षणराजौ, प्रत्यक्षज्ञानस्य भ्रमप्रमाभेदेन द्वैविध्यं स्वीकुर्वन्ति न्यायसिद्धान्ततत्वामृते प्रमाभिन्नं ज्ञानं भ्रम इति लक्षणानि निर्दिष्टानि दृश्यन्ते। जैनाः अतस्मिन् तदध्यवसायस्समारोप एव अप्रमेति प्रमाणनयतत्त्वालोके रत्नाकरावतारिकायां च न्यरूपयन्। प्रमाणवार्तिकभाष्ये 'कल्पनपोढं प्रत्यक्षम'[11], ततो विकल्पस्त्रिविधोऽपि प्रत्यक्षाभास इति बौद्धाः वदन्ति।

न्यायविदः तदभाववति तत्प्रकारकं ज्ञानमारोप इति वदन्ति। आहार्यः, भ्रमश्चेति स द्विविधः। तत्र बाधज्ञानसमकालिकेच्छाजन्यज्ञानमारोपः, यथा रजतत्वाभाववतीं शुक्तिं रजतत्वेन जानीयामिति बाधज्ञानसमकालिकेच्छाजन्यम् इदं रजतमिति ज्ञानम्। भ्रमे तु उत्तरकाले नेदं रजतम्, किं तर्हि इयं शुक्तिरिति बाधज्ञानं भवतीति विशेष इति प्रत्यक्षाभास ज्ञानम् वक्तव्यम्। एवमाहर्यज्ञानमपि प्रत्यक्षाभासः, प्रमाभास इति स्वविरोधिधर्म-धर्मितावच्छेदक-स्वप्रकारकं ज्ञानमाहार्यमिति हेत्वाभाससामान्यनिरुक्तिगङ्गाटिप्पण्यां निरूपितम्। यथा इदं रजतमित्यत्र स्व रजतत्वं, तद्विरोधी धर्मः रजतत्वाभावः स धर्मिताऽवच्छेदको यत्र, एवं स्वं रजतत्वं प्रकारो यत्र तादृशं ज्ञानमियं शुक्ती रजतमिति ज्ञानम्, तदेवाहार्यमिति तस्याप्याभासत्वमुपवर्णितम्।

एवं संशयविपर्ययस्मृतिव्यतिरिक्ताया आत्मचिच्छक्तेः प्रमात्वस्वीकर्तरि संशयादीनां प्रमाभासत्वं शैवदर्शनेऽपि अङ्गीकृतं वर्तते। (शैवपरिभाषा)। अयथार्थज्ञानमेव अध्यासनाम्ना

व्यवहरति शाङ्करादवैतवेदान्तदर्शनम्। परत्र पूर्वदृष्टावभास इति लक्षणञ्चोपवर्णितम्। विपर्ययनिरूपणावसरे इदं सर्वं सुष्ठु प्रतिपादयिष्यते।

अप्रमाभेदाः

संशय-विपर्यय-अनध्यावसाय-स्वप्नभेदेन[12] अयथार्थात्मिका अप्रमा चतुर्धेति प्रतिपाद्यते प्रशस्तपादभाष्ये। संशयनिश्चय व्यतिरेकेण तर्कज्ञानस्यासंवेदनात्, इन्द्रियार्थसन्निकर्षादिरिव तर्कोत्पत्तौ प्रमाणमिति प्रत्यक्षफलादविशेषाच्च तर्को न ज्ञानान्तरम् परन्तु संशयनिश्चययोरेवान्तर्भाव इति व्योमवत्यां प्रतिपाद्यते। समानतन्त्रे न्यायदर्शने तर्कस्य प्रतिपादितत्वात् वैशेषिकदर्शने तस्यानभिधानमित्यपि वक्तुं शक्यते। यद्यपि संशयनिर्णयाभ्यां तर्को न भिद्यते, किञ्च अनुमानमेव तर्क इत्यप्याहुः तथापि प्रमाणानामनुग्राहकत्वात् तर्कस्य पृथगुपादानमिति न्यायवार्तिके[13]। ततश्च संशय-विपर्यय- तर्क-भेदेन अप्रमा त्रिविधेति पश्चात्तनेषु न्यायवैशेषिकग्रन्थेषु तर्कभाषा - तर्कसंग्रह पदार्थरत्नमालादिषु वर्णिता। संशये विपर्ययतर्कयोरन्तभावं प्रकल्प्य भ्रमसंशयभेदेन अप्रमा द्विविधा इति तर्ककौमुद्यां निरूपितम्। "तत्तप्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः" इति करिकावल्याम् अप्रमा संशयविपर्ययभेदेन द्विविधेति मुक्तावल्यां च निरूपिता। अप्रमाजन्या स्मृतिरपि तर्कसंग्रहे अङ्गीकृता। न्यायवैशेषिकेषु संशय-विपर्यय- तर्क अयथार्थ स्मृतयश्चेति अप्रमाभेदाः दरीदृश्यन्ते। मीमासायां च संशय-विपर्यय- तर्क अनध्यवसाय-विकल्प-अनुवाद-स्मृतयः प्रमाभासा इति प्रमाणलक्षणे प्रतिपादितम्।

बाह्यार्थानुमेयवादिनां विज्ञानिनां शुन्यवादिनाञ्च बौद्धानां दर्शने भ्रान्ति-संवृति-साज्ञान-अनुमान-आनुमानिक-स्मरण-अभिलाष-भेदेन प्रमाभासज्ञानं विभज्यते[14]। स्मृति -प्रत्यभिज्ञान-तर्क-अनुमाना-आगमभेदात् परोक्षज्ञानविभागं तेषां प्रामाण्यञ्च अङ्गीकुर्वतां जैनानां दर्शने विकल्प-संशयावेव प्रमाभासाविति उद्घुष्टम्[15]। पंचपर्वा अविद्येति विपर्यय-अस्मिता-राग- द्वेष-अभिनिवेशभेदेन प्रमाभासभेदा इति साङ्ख्यदर्शनात् अवगम्यते। (सांख्यतत्वकौमुदी कारिका 47) सांख्य प्रवचनभाष्ये (3/37)।

योगदर्शने च ईश्वरप्रणिधानस्य अन्तरायभूतानां चित्तविक्षेपकराणां व्याधि-अस्त्यान-संशय-प्रमाद-आलास्य-अविरति भ्रान्तिदर्शन- लब्धभूमिकात्व - अनास्थितत्वानां परिगणना, तेषां आविद्यकत्वकथनाच्च तेषामपि प्रमाभासता प्रतिपादिता भवति। सोपाधिकनिरुपाधिकभेदेन अप्रमा द्विविधेति अद्वैतवेदान्तदर्शनादवगम्यते। विशिष्टाद्वैतदर्शने सर्वं विज्ञानं यथार्थमेवेति स्वकर्तरि अयथार्थज्ञानमप्रमाज्ञानं प्रमाभासज्ञानं वा नाङ्गीक्रियते। द्वैतदर्शने प्रमाणपद्धति - प्रमाणसंग्रह - प्रमाणचन्द्रिकादौ संशयविपर्यय-भेदेन अप्रमाज्ञानं द्विविधमिति निरूपितम्। कृष्णभक्तिप्रधाने चैतन्यसम्प्रदाये भ्रमः प्रमादो विप्रलिप्सा-करणापाटवञ्चेति अप्रमाहेतवः, तन्मूलकाप्रमाण्यज्ञानञ्च स्वीकृतम् श्रीतत्वसन्दर्भव्याख्या-बलदेवविद्याभूषणटीका[16]। वल्लभदर्शने निर्विकल्पक-सविकल्पकभेदेन ज्ञानद्वयं स्वीकृत्य सविकल्पकस्य संशय-विपर्यय-निश्चय-स्मृति-स्वाप्नवृतिभेदात् पञ्चधा विभागः कृतः संशयादिविनिर्मुक्ता चिच्छक्तिर्मानमुच्यते" इति, संशय-विपर्यय-स्मृति-

व्यतिरिक्ता प्रमापरपर्याया आत्मचिच्छक्तिरिति प्रमाणसामान्यलक्षणवादिनि शैवदर्शने अप्रमाज्ञानं संशय-विपर्यय-स्मृति-भेदेन त्रिविधं-स्वीकृतम्।

अस्वसंविदित-गृहीतार्थदर्शन- संशय-विपर्यय अनध्यवसायाः प्रमाभासा इति जैनाः प्रमेयरत्नमालायां प्रवदन्ति। तेषां स्वविषयोपस्थापकत्वाभावात् प्रमाभासता च स्वीकृता। प्रमाभासज्ञानं अतत्त्वज्ञानं-मिथ्यांत्व-मिथ्याप्रत्यय-भ्रम -विभ्रम-व्यभिचारीज्ञान- विपर्यय-मिथ्याज्ञान- असम्यग्ज्ञान-अविद्या-अध्यारोप-अध्यासादिशब्दैः दर्शनेषु व्यवह्रियते।

**आकरग्रन्थाः**

1. तर्कसङ्ग्रहः
2. न्यासिद्धान्तमुक्तावली
3. प्रमेयकमलमार्तण्डः
4. प्रमेयरत्नमाला
5. वैशेषिकसूत्रम्
6. न्यायवार्तिकम्
7. तर्कदीपिका
8. प्रमाणवार्तिकभाष्यम्
9. न्यायकन्दली

सन्दर्भ :

1. तर्कसङ्ग्रहः
2. तर्कसङ्ग्रहः
3. वै. सू. 9-2-10
4. वै. सू. 9-2-13
5. न्या. वा- 1-1-2
6. का. 127
7. तर्कदीपिका,
8. तर्कसंग्रहः-
9. न्यासिद्धान्तमुक्तावली
10. पदार्थरत्नमालयाम्
11. प्रमाणवार्तिकभाष्यम्, पु.सं. 332
12. न्यायकन्दल्याम्
13. न्यायवार्तिकम्, पु.17
14. (प्रमाणसमुच्चयः (प.20) प्रमाणवार्तिक (प.196) प्रमाणवार्तिकभाष्येषु (प.332)
15. प्रमेयकमलमार्तण्डः (प.13) प्रमाणमीमंसा प्रमेयरत्नाकरः(प.13) प्रमेयरत्नमालादिषु।
16. पु.12